अञ्चित्वा जानु जुहोति CāndraVṛ. *on* v. 4.113 = KāśiVṛ. *on* P. vii. 2.53; Bhatti. 9.40.

**अञ्चु** ( añc–u ) 1 verbal root *añc*– **A** अञ्चु गतिपूजनयोः DhātuPā. i. 203 = DhātuPra. i. 185 (21.19) = DhātuVṛ. i. 190; DhātuPā.(S'āk.) i. 337; KāvyKaVṛ. 92.25 (3.5); **B** अञ्चु गतौ याचने च DhātuPā. i. 915 = DhātuPra. i. 865 (63.7) = DhātuVṛ. i. 852; **C** अञ्चु विशेषणे DhātuPā. x. 198 = DhātuPra. x. 203 (142.23) = DhātuVṛ. x. 201; **D** –*añc* as a derivative suffix अपपरिबहिरञ्चवः पञ्चम्या P. ii. 1.12; JaineVyā. i. 3.10 (48.21); ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च P. iii. 2.59; JaineVyā. ii. 2.57 (107.9); CāndraVyā. i. 2.50; MugdhaBo. 3.134 (31.1); अञ्चुरूपे उत्तरपदे इत्यर्थात् LaS'abdeS'e. i. 342.22; i. 346.20.

**अञ्चुद्यु** ( añcu–dyu ) *adj.* (a compound) with –*añc* as the last (derivative) member दिक्छब्दान्याराद्तिरर्तेऽञ्चुध्वा(? द्युवा)हियुक्ते JaineVyā. i. 4.38 (70.17) cf. **अञ्चूत्तरपद**.

**अञ्चू** ( añc–ū ) (Gr.) verbal root *añc*– (to go) अञ्चू गतौ च DhātuPā.(S'āk.) i. 337; अञ्चू इति पठन् शाकटायनः DhātuVṛ. i. 852; DhātuPā.(H.) 1.105; अञ्चुञ् (v. l. अञ्चू) गते KaviKaDru. 100.

**अञ्चूग्** ( añc–ūg ) (Gr.) the verbal root *añc*– (to go) (*g* indicates the use of both P. Ā.) अञ्चूग् गतौ च DhātuPā.(H.) i. 890.

**अञ्चूत्तरपद** ( añcūttarapada ) *adj.* (a compound) with –*añc* as the last (derivative) member अन्याराद्तिरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते P. ii. 3.29; अञ्चूत्तरपदं प्राक्प्रत्यगादिपदम् BhāṭṭCin. i. 105.12 (*on* i. 1.4); तथापि पराक्छब्दस्य अञ्चूत्तरपदत्वेन अञ्चूत्तरपदयोगनिमित्ता पञ्चमीयं कुतो न भवेत्… न तदर्थमञ्चूत्तरपदग्रहणं च कर्तव्यम्… अञ्चूत्तरपदप्रत्याख्यानाभिप्रायेण दिक्छब्दत्वाभाव उपपादितः MayūMāli. 725.9 (*on* x. 5.11); LaS'abdeS'e. i. 503.10.

**अञ्चोल** ( añcola ) *m.* name of a country अञ्चोलद्विचराश्च ये । कृत्वा त्रिधा सिंहवन्तं सीतागात् पश्चिमोदधिम् BrahmāṇḍP. i. 18.45.

**अञ्ज्** ( añj– ) VII(I). P. (Ā.) [ MAYR. 1. p. 32; अञ्जू (áñjū) व्यक्तिम्रक्षण(कान्ति)गतिषु DhātuPā. vii. 21; KṣīraTa. 7.21; DhātuPra. 7.21 (120.14); DhātuVṛ. 7.21; Nyās. iii. 997.9 (*on* viii. 2.48); used with Acc. of object and Inst. of means, or Loc. of place and Acc. of substance; with two Acc. S(?) ṚV. viii. 63.1; recorded forms अनक्ति ( Vedic अञ्जति ), अङ्क्ते, अनक्तन, अनजत्, अङ्ग्धि, अनक्तु, अञ्ज्यात्, अञ्जीत, आनक्, आञ्जन्, अञ्जत (without aug.), आनञ्ज, आनजे, अनजा, अनज्यात्, आञ्जिजत्, आञ्जीत्, अञ्जीः, अज्यते; used with the preverbs अनु ( S'atBr. अनुवि AVPrāti. ), अभि ( ṚV. अभिवि, अभ्या AitBr. ), आ (ṚV.), उद् (ṚV.) उप (S'atBr.), नि (AV.), प्रति ( AitĀ. प्रत्युप S'atBr. ), वि, सम् ( ṚV. संनि S'atBr. ), समा and *gati* अन्तर् ] **A i** to anoint, to besmear, to cover with, to consecrate (with any liquid substance) स दक्षाणां दक्षपतिर्बभूवाञ्जन्ति यं दक्षिणतो हविर्भिः ṚV. i. 95.6; युवां यज्ञैः प्रथमा गोभिरञ्जत ऋतावाना ṚV. i. 151.8; अनक्ति यद्वां विदथेषु होता ṚV. i. 153.2; अञ्जन्ति त्वामध्वरे देवयन्तः … मधुना ṚV. iii. 8.1; TaiBr. III. vi. 1.1; मधोर्धाराभिरज्यसे ṚV. iii. 40.6; पश्वो अनक्ति सुधितः सुमेकः ṚV. iv. 6.3; शुचिरङ्क्ते शुचिभिर्गोभिरग्निः ṚV. v. 1.3; v. 3.2; v. 43.7; आयुं न यं नमसा रातहव्या अञ्जन्ति सुप्रयसं पञ्च जनाः ṚV. vi. 11.4; अग्निर्देवाँ अनक्तु नः ṚV. viii. 39.1; viii. 63.1; मध्वा होतारो अञ्जते ṚV. viii. 72.9; सोमासो गोभिरञ्जते ṚV. ix. 10.3; ix. 32.3; ix. 66.9; इन्दुर्हिन्वानो अज्यते मनीषिभिः ṚV. ix. 76.2; ix. 78.2; ix. 102.7; ix. 109.20; भगो वा गोभिरर्यमेनमनज्यात् ṚV. x. 31.4; x. 76.1; x. 100.10; x. 118.3; अङ्ग्धि सं वर्तया पणिम् ṚV. x. 156.3; अजमनज्मि पयसा घृतेन AV. iv. 14.6; देवः पथो अनक्तु मध्वा घृतेन AV. v. 27.1; v. 28.3; अश्विना सारघेण मा मधुनाङ्क्तं शुभस्पती AV. vi. 69.2; देवस्त्वा सविता मध्वानक्तु TaiS. I. iii. 5.1; VājaS. 6.2; याङ्क्ते तस्यै काणः TaiS. II. v. 1.7; III. iii. 10.2; घृतेनाक्तौ पशुं त्रायेथाम् TaiS. I. iii. 8.1; VājaS. 6.11; 20.39; 27.12; अध्वरे ह्येनं देवयन्तोऽञ्जन्ति AitBr. 6.2 (142); त्वमङ्क्ष्व त्वचमङ्क्ष्व TaiBr. III. vii. 5.2; इमान् एवैतल्लोकान् रसेनानक्ति JaimiBr. 1.72; घृतेन समिधोऽनक्ति GopBr. i. 2.15; नाधीयीत…नाङ्क्ते BaudhS'S. i. 298.5; इलामुपह्वास्यमानस्य दक्षिणस्य पाणेः प्रदेशिन्यामनक्ति S'āṅkhāS'S. i. 10.1; iv. 16.6; अनक्त्यग्राणि जुह्वाम् MānS'S. 23.8; देवस्त्वा सविता मध्वानक्तीति स्रुवेण पुरोडाशमनक्ति ĀpaS'S. ii. 11.3; iii. 5.7; xviii. 14.8; xxiii. 7.8; iii. 14.7; अञ्जन्ति घर्मं तत्र शार्ङ्गम् LāṭyāS'S. i. 6.23; पुरोडाशौ … अनक्ति KātyS'S. ii. 8.14; स्त्रीणामक्षीण्यनक्ति KauśiGS. v. 8.5; नाङ्क्ते BaudhGS. i. 7.29; सव्यं अग्रे अक्षि अञ्जीत अथ दक्षिणम् JaimiGS. 6.19 (17.19); अञ्जनानुलेपनं स्रजश्चाञ्जस्वानुलिम्पस्व स्रजोऽभिनह्यस्वेति PāraGS. ii. 14.17; ताभिरद्भिः पुत्रकामो मुखमनक्ति ĀśvaGS. iv. 7.13; i. 8.9; अथ परिधीननक्ति BaudhGS. i. 4.35; VaikhāGS. 4.1 (54.10); बर्हिराज्यशेषेऽनक्ति KauśiSū. 6.5; 25.4; कृष्णचतुर्दश्यां शस्त्रहतायाः गोः कपिलायाः पित्तेन राजवृक्षमयीममित्रप्रतिमामञ्ज्यात्; अन्धीकरणम् ArthS'ā. iii. 235.6 (14.3); त्रिरात्रं रजस्वला शुचिर्भवति सा नाञ्ज्यात् VasiSm. 5.7; अनक्ति हृदये तस्या दध्नालाभे घृतं च तत् LaghvāśvaSm. 15.53; आज्येन यूपमनक्ति S'ābaBh. 1133.8 (*on* iii. 8.31); शलाकया सुवर्णस्य अक्षिणी… । अञ्जयेत् AgniP. 96.51; ṬupṬ. 19.12 (*on* iv. 2.1); इन्दुर्नेत्रे सुधाभिरनक्ति नः AnarghaRā. 2.69; प्रथमं सव्यमञ्ज्यात् SiddhYo. 61.17; मौर्यवंशाब्धिचन्द्रमाः । अनक्ति स स्वयमपि नेत्रे तप्तशलाकया PariPar. 9.29; यजमानः स्वमुखमञ्ज्यात् CaturCin. iii(1). 1297.13; अनक्ति स नयने क्षणात् SamarāSaṁ. 6.116; VīraMi. (S'uddhi.) 11.6; **A ii** to anoint with, to bathe in, to put on (lustre, ray etc.) पूर्वे अर्धे रजसो भानुमञ्जते ṚV. i. 92.1; देवासो विश्वधायसस्ते माञ्जन्तु वर्चसा AV. iii. 22.2; xviii. 3.10; वसवस्त्वाञ्जन्तु गायत्रेण छन्दसा TaiS. VII. v. 20.1; VājaS. 23.8; वर्चसा माञ्जीः TaiĀ. iv. 10.4 (492.1); तेजसैवैनमनक्ति TaiĀ. v. 4.5 (605.1); भित्त्वा शनैस्तिमिरमञ्जनपुञ्जनीलमानञ्जुरिन्दुकिरणा जगदञ्जसारात् HarVi. 20.52; **A iii** to besmear, to cover with, to endow with (abstract things) त्वम्…मायागुणैर्नाज्यसे AdhyāRā. vii. 1.63; न हि श्रोत्रोत्थविज्ञानं रूपवासनयाज्यते BṛĀraUBhVā. ii. 3.108; प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः BhāgP. iii. 27.1; xi. 6.8; कथमज्यते जगदशेषमिदं कलयन्मृषेति हृदि कर्मफलैः S'aṅkaDigVi.(Mā.) 9.95; **B** to put on, to decorate with (ornaments etc.) व्युच्छन्ती रश्मिभिः सूर्यस्याञ्ज्यङ्क्ते समनगा इव व्राः ṚV. i. 124.8; प्र शर्धाय मारुताय स्वभानव इमां वाचमनजा पर्वतच्युते ṚV. v. 54.1; बभ्रुरेको विषुणः सूनरो युवाञ्ज्यङ्क्ते हिरण्ययम् ṚV. viii. 29.1; **C i** to make manifest, to reveal, to show (due to अञ्ज् with वि) पुरुदस्मो विषुरूप इन्दुरन्तर्महिमानमानञ्ज धीरः VājaS. 8.30; तुभ्येत्सो अज्यते रयिः VājaS. 33.82; अज्यते केनचित् [कश्चित्] किंचित्केनचिदज्यते MūlaMādhyaKā. 9.5 (comm. अभिव्यज्यते); मा नाञ्जी राक्षसीर्मायाः Bhaṭṭi. 9.49 (comm. मा न व्यक्तीकुरु); तद्दादृशुष्यं प्रति वैविदुष्यमाञ्जीञ्चुलुक्यश्च समाधिलग्नः DvyāśraKā. 10.67; **C ii** to praise, to extol इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे ṚV. i. 102.1; **D** to unite, to join together जने मित्रो न दंपती अनक्ति ṚV. x. 68.2.

**अञ्ज्** ( añj– ) x. [ अजि…भासार्थाः । एते सकर्मका भासार्था णिचमुत्पादयन्ति KṣīraTa. x. 245; DhātuPra. 7.21 (120.15); अजि … इत्येते पंचदश स्वामिकाश्यपानुसारेण लिख्यन्ते । भाषार्थाः DhātuVṛ. x. 245 ] to anoint, to besmear, to apply collyrium काचिदञ्जनमादाय नेत्रे अञ्जयति ध्रुवम् ĀdiP. 25.34; वृक्षमूले कज्जलं संगृह्य … । नेत्राण्यञ्जयेत् BhaviP. 63A.13 (i. 29.25); EI. xxi. 48.28; कज्जलेनाञ्जयेत्तेन लोचने प्रयतो नरः Mānaso. ii. 3.344; तेन पांसुनाक्षं रथस्याञ्जयेल्लिम्पेत् VedāntKa. 452.23 (*on* iii. 3.40); निर्घृष्य नृकपालं तु नारीस्तन्येन चाञ्जयेत् RasRaSa. 23.55; 23.54; मनुष्यलालया घृष्टा ततो नेत्रे तयाञ्जयेत् RaseCin. 9.357 (271.4); अञ्जयेद्द्विपमेतेन Hastyāyur. 636.10 (4.14); गोरोचना प्रियङ्गुर्मनःशिला नागपुष्पचूर्णं च । अञ्जयेच्चक्षुरमीभिर्यस्तस्य वशत्वमेति जनः NāgaSa. 12.12; समानिनाय पुरतो नयने तेन चाञ्जयत् KathāKau. 2.52; 13.24; NirSi. 248.1; अञ्जयेन्मतिमान्वैद्यः AśvaVai. 30.20; विलोचने नाञ्जयति स तारम् BhāvS'. 32.

**अञ्ज** ( añja ) *m.* (hollow of) both hands joined together प्रसृतैककरे वै तु प्रसृतिः … उक्तपाणिद्वये प्रोक्तश्चाञ्जलिश्चाञ्ज इत्यपि ParyāS'aRa. 656.

**अञ्जक** ( añj–aka ) *adj.* (a word) indicative of (similarity) अन्यतमस्य च लोपे वाचकधर्मोपमानानाम् । धर्माञ्जकयोरञ्जकसमयोः समधर्मयोः समान्येषाम् AlaṅkāKau.(Vi.) 104.11; (उपमा) न वाक्यजाञ्जकलुक् AlaṅkāKau.(Vi.) 117.6; *m.* name of a son of Vipracitti and Siṁhikā (सिंहिकायामथोत्पन्ना विप्रचित्तेः सुताः) अञ्जको नरकश्चैव … । स्वर्भानुश्च ViṣṇuP. i. 21.11 (VIDYĀSĀGARA Ed.)

**अञ्जकेश** ( añjakeśa ) *m.* name of a king मु(v. l. अ)ञ्जकेश इति ख्यातः …आसीत् स पार्थिवः MāhāBhā. i. 61.26.

**अञ्जत्** ( añját ) *adj.* anointing, besmearing, decking, adorning स्वरुं न पेशो विदथेष्वञ्जन् ṚV. i. 92.5; समिद्धो अञ्जन् कृदरं मतीनाम् TaiS. V. i. 11.1; उपयामेऽञ्जन् समिध आदधाति MānS'S. 110.9; ĀpaS'S. xv. 11.6; तिमिरहतमयं महोभिरञ्जञ्जयति जगन्नयनौघमुष्णभानुः AnarghaRā. 2.13; अञ्जन्निवाक्षीणि विलोककानाम् Rāgh. 20.9.

**अञ्जन** ( áñj–ana ) *n.* [for accent cf. आञ्जन; अञ्जेरञ्जनमञ्जनं च प्रकाशनम् । अङ्क्तेऽक्षिणी इत्युच्यते यत्तत्सितं चासितं चैतत्प्रकाशयति MahāBh. iii. 408.23 (*on* viii. 2.48); अज्येते येनाक्षिणी तदञ्जनम् Pradī. vii. 123.16 (*on* viii. 2.48); included in the *goṣadādi gaṇa* GaṇPā. 80.10; GaṅRa. 7.436 (460); *añjanādi, kiṁśulakādi* GaṇPā. 50.4; GaṇRa. 2.141 (177); CāndraVṛ. *on* iv. 2.156; JaineVyā. iv. 1.66; neut. gender is given by Liṅgānu.(Ha.)